# संस्कृतवार्ता:

दिनाङ्क :-28.09.2025

प्रात: - 06:55

<u>प्रधानमन्त्री/'मन की बात'-कार्यक्रम:</u>

प्रधानमन्त्री नरेन्द्र-मोदी अद्य प्रात: एकादश- वादने आकाशवाणीत: 'मन की बात' इति कार्यक्रमे स्वीयं मनोगतं प्रकटयिष्यति। मासिकस्य आकाशवाणी-कार्यक्रमस्य एतत् षड्विंशत्यधिक-शत-तमं संस्करणं भविष्यति। आकाशवाण्या: दूरदर्शनस्य च सर्वाभि: वाहिनीभि: अस्य कार्यक्रमस्य प्रसारणं भविष्यति। अयं हि आकाशवाणी-वार्ता-विभागस्य अन्तर्जाल-पटले www.newsonair.gov.in इत्यत्र, अपि च newsonair इति चल-दूरभाषीये तन्त्रांशे अपि उपलब्ध: भविष्यति। आकाशवाणी-दूरदर्शनवार्ता-प्रधानमन्त्रीकार्यालय-सूचनाप्रसारण-कार्यालयानां यू-ट्यूब-वाहिनीभि: अपि अस्य कार्यक्रमस्य साक्षात्-प्रसारणं भविष्यति। हिन्दी- भाषायां प्रसारणस्य पश्चात् अस्य प्रसारणम् आकाशवाण्याक्षेत्रीयासु भाषासु अपि भविष्यति।

<u>प्रधानमन्त्री-ओडिशा</u>

प्रधानमन्त्री नरेन्द्रमोदी ह्य: ओडिशाया: झारसुगुड़ात: षष्टि-सहस्र-कोट्यधिक-रूप्यकाणांनैकासां विकास-परियोजनानाम् उद्घाटनं शिलान्यासं च अकरोत्। तेनोक्तं यत् भारतं दूरसञ्चार प्रौद्योगिक्या: वैश्विकं केन्द्रं भवितुम् अग्रसरम् अस्ति। एता: परियोजना: दूरसंचार-रेलवे उच्च-शिक्षा स्वास्थ्यसेवा कौशल-विकास ग्रामीण आवासं च समेत्य विविधक्षेत्रै: सह सम्बद्धा: सन्ति। श्रीमोदिना सूरतस्य उधना इत्यस्य ओडिशाया: च ब्रहमपुरस्य मध्ये सञ्चाल्यमानाय गुजरातस्य प्रथमामृत-भारत-एक्सप्रेस रेलयानाय अपि वर्चुअल इति प्रातिभाषिक-माध्यमेन हरितध्वज: प्रदर्शित:। अत्रावसरे ओडिशाया: राज्यपाल: हरि-बाबू कम्भमपति: मुख्यमन्त्री मोहनचरण माझी अन्य-गणमान्यजना: उपस्थिता: आसन्। अस्मिन् अवसरे केन्द्रीय-रेल-मन्त्री अश्विनी-वैष्णव: केन्द्रीयो जल-शक्ति: मन्त्री सी. आर. पाटिल: च उधना रेलवे स्थासने उपस्थितौ अवर्तताम्। प्रधानमंत्री जनसभां संबोधयन् अवोचत् यत् केन्द्र-प्रशासनेन सद्य एव राज्ये द्वयो: सेमीकंडक्टर संयन्त्रयो: स्थापनायै अनुमति: प्रदत्ता। अयं ओडिशाया: औद्योगिक-प्रौद्योगिकविकासम् उन्नेतुं महत्वपूर्ण-पदक्षेप: अस्ति।

<u>करूर-स्टाम्पेड:</u>

तमिनडुराज्यस्य करूरनगरे एकस्यां राजनैतिक-जनसभायां भगदड़ इति जन समूहानां अनियन्त्रणे मृतानां सङ्ख्या षड्त्रिंशत् अभवत्।

विभिन्नेषु चिकित्सालयेषु पञ्चाशत् तः अधिकाः जनाः उपचाररताः सन्ति। तमिलनाडु-राज्यस्य मुख्यमन्त्रिणा एम्. के. स्टैलिन्-इत्यनेन ह्यः पददलने मृतकानां परिवाराणां कृते दशलक्षरूप्यकाणां अनुग्रहराशेः घोषणा कृता। ये आई. सी. यु. विभागे चिकित्सारताः सन्ति तेभ्यः एकलक्षरूप्यकाणि प्रदीयन्ते। मुख्यमन्त्री उच्चन्यायालयस्य सेवा निवृत्तस्य न्यायाधीशस्य अरुणा जगदीशनेत्यस्याः अध्यक्षतायां घटनायाः कारणम् अन्वेषणार्थं एकसदस्यीय-आयोगस्य घोषणाम् अकरोत्। एषः जनसमागमः नेतुः अभिनेतुः च विजयस्य तमिलगा वेत्री कजगम् इत्यनेन आयोजितः आसीत्। अभिनेता विजयः शोकाकुलान् परिवारान् प्रति गभीरं शोकं प्रकटितवान्। राष्ट्रपतिः द्रौपदी मुर्मु, उपराष्ट्रपतिः सी. पी. राधाकृष्णन्, प्रधानमन्त्री नरेन्द्रमोदी च घटनायां मृत्युषु दुःखम् प्रकटितवन्तः।

उप-राष्ट्रपतिः-बिहारः

उप-राष्ट्रपतिः सी. पी. राधाकृष्णन् वर्यः अद्य बिहारस्य एकदिवसीय यात्रायां भविष्यति। सः पटना-नगरे उन्मेष-अन्ताराष्ट्रिय-साहित्य-महोत्सवस्य तृतीय-संस्करणस्य समापन-सत्रे मुख्यातिथिरूपेण सम्मिलितः भविष्यति। उपराष्ट्रपतिः मुज़फ़्फ़रपुरस्य कटरा-नगरस्य चामुण्डा-देवी-मन्दिरेपि गमिष्यति।

भारत ऋतु विज्ञान

भारत-ऋतु-विज्ञान-विभागेन अद्य गुजरात, कोङ्कण, गोवा, मध्यमहाराष्ट्रेषु अति वृष्टेः रेड अलर्ट इति रक्तवर्णीया सञ्चेतना प्रसारितास्ति। ऋतुविभागेन मध्यप्रदेशे, विदर्भे, पश्चिमबङ्गे, सिक्किमे, बिहारे, झारखण्डे अण्डमान-निकोबारद्वीपः समुहेषु च आगामि द्वि-त्रिदिवसेषु अत्यधिकवृष्टेः संभावना प्रकटीता अस्ति।

विंशति-प्रतिविंशतिः

पुरुषाणां विंशति-प्रतिविंशतिः एशिया-चषक-प्रतिस्पर्धायाः निर्णायक-स्पर्धा भारत-पाकिस्तानदेशयोः मध्ये अद्य दुबई-नगरे भविष्यति। स्पर्धायाः आरम्भः भारतीयसमयानुसारं सायं अष्टवादने भविष्यति।

।।इति वार्ताः।।